उपनिषद्भाष्यकार-पण्डितसम्राट्-स्वामिश्रीवैष्णवाचार्य-
वेदान्तपीठाचार्यप्रणीतः

श्रीरामानन्दसिद्धान्तसारः

कुर्वे श्रीराघवं नत्त्वा रामानन्दं तथा गुरुम् ।
श्रीरामानन्दसिद्धान्तसारं तत्त्वावबुद्धये ॥१॥

परब्रह्म श्रीरामः

श्रीरामभजनात् सर्वे शोका नश्यन्ति देहिनाम् ।÷
मुक्तिदं परमं ब्रह्म रामं वेदा वदन्ति हि ॥२॥

विशिष्टाद्वैतमतम्

रामानन्दमतं श्रौतं विशिष्टाद्वैतनामकम् ।
अद्वैतं न मतं श्रौतं श्रौतयौक्तिकबाधतः ॥३॥
विशिष्टब्रह्मणोरैक्यं कार्यकारणसंज्ञयोः ।
मतं च वैदिकं तद्धि विशिष्टाद्वैतसंज्ञकम् ॥४॥

ईशतज्ज्ञानभिन्नं हि द्रव्यं देहाया मतम् ।
अपृथक्सिद्धिसम्बन्धः सम्मतो देहिदेहयोः ॥५॥
कल्याणगुणधामाथ दिव्यदेहो हि राघवः ।
चिदचिद्देहवैशिष्ट्याद् विशिष्टं ब्रह्म कथ्यते ॥६॥
स एव प्रलये रामः कारणं ब्रह्म कथ्यते ।
स जगद्रूपतां प्राप्तः कार्यब्रह्मतयोच्यते ॥७॥
सच्चिदानन्दरूपोऽसौ रामो दोषविवर्जितः ।
अनन्तास्तस्य रामस्य रूपदेहगुणाः स्मृताः ॥८॥
अद्भुता च परा शक्तिर्गुणा ज्ञानबलादयः ।
श्रीरामस्य श्रुता वेदे स्वाभाविका मायिकाः ॥९॥
श्रीरामो भगवान् स्वामी समाभ्यधिकवर्जितः ।
सर्वज्ञो वेदवेद्योऽथ सर्वेषां हि नियामकः ॥१०॥
जगत्कर्त्ता विभू रामः सर्वेषामीश्वरस्तथा ।
संहारकश्च सर्वस्य विश्वस्य परिपालकः ॥११॥
सर्वाराध्यश्च रामो हि सर्वकर्मफलप्रदः ।
सर्वस्य जगतो मूलं विध्यादेश्च विधायकः ॥१२॥
श्रीमद्रामस्य चाधीनं विभूतिद्वयमीरितम् ।
स्वाधीनः परमो भक्त्या भक्ताधीनश्च राघवः ॥१३॥
रामः स्वजनदोषाणां न च स्मर्त्ता कदापि हि ।
सन्तोषं परमं याति भक्तसत्कर्मलेशतः ॥१४॥

स्वयं चाधारशून्योऽपि सर्वाधारः प्रकीर्त्तितः ।
सर्वं हि स्वेच्छया रामो विदधाति दधाति च ॥१५॥
प्रलये रामचन्द्रस्य देहरूपतया मते ।
सूक्ष्मे चिदचिती नामरूपहीने प्रकीर्त्तिते ॥१६॥
प्रलयान्ते यदा रामो जगत् स्रष्टुं समीहते ।
दधाते नाम रूपं च तदा चिदचिती खलु ॥१७॥
तदानीं च सिसृक्षुश्रीजानकीनाथवाञ्छया ।
जीवप्रकृतिवाच्यौ तद्देहौ विकारमाप्नुतः ॥१८॥
नित्यं जीवस्वरूपं हि निर्विकारं मतं बुधैः ।
ततो जीवस्वभावो हि विकारित्वेन सम्मतः ॥१९॥
सङ्कोचश्च विकासश्च विकारौ जीवसंविदि ।
सम्मतौ शास्त्रमर्मज्ञैः प्राकृतदेहधारणात् ॥२०॥

जीवः

ज्ञातारो ज्ञानरूपाश्च जीवाः सर्वेऽजडा मताः ।
सर्वे चाणुप्रमाणास्तेऽमर्यादा विभवो न हि ॥२१॥
उत्क्रान्तिश्च गतिश्चेति जीवस्यात्रागतिस्तथा ।
श्रुताः श्रुतौ ततो जीवस्त्वणुरेव विभुर्न हि ॥२२॥
नाहं देहादयः किन्तुते ममेति प्रतीतितः ।
जीवा देहादिरूपा नो प्रारब्धफलभोगिनः ॥२३॥
तच्चैतन्यापृथक्सिद्धं द्रव्यं मतं हि तद्वपुः ।
प्रमेयपरिशोधिन्यां देहभेदा निरूपिताः ॥२४॥

जीवानां देहमानत्वे स्वीकृते कर्मयोगतः ।
गजदेहग्रहेऽपूर्णो काकात्मा च भवेत् किल ॥२५॥
तेषां सावयवत्वं च तत्सङ्कोचविकासयोः ।
अनित्यत्वं भवेन्नूनं जीवानां तेन हेतुना ॥२६॥
अनित्यत्वे तु जीवानां दोषद्वयं दुरुद्धरम् ।
अकृतस्यागमश्चाथ कृतस्य विप्रणाशिता ॥२७॥
दीपज्योतिरिव ज्ञानं जीवस्य व्यापकं मतम् ।
हृत्स्थो जीवोऽखिलं वेत्ति ततो देहसुखादिकम् ॥२८॥
प्रारब्धं राघवेच्छैव व्यापिका सा यतस्ततः ।
तत्र तत्र च भोगार्थं पदार्था उद्भवन्ति हि ॥२९॥
नित्याः सुखस्वरूपाश्चेश्वरस्यांशाश्च चेतनाः ।
केचित् कर्मवशाद् रङ्का भूमिपालास्तथाऽपरे ॥३०॥
'सुखमहं हि चास्वाप्समि' त्येतादृक्प्रतीतितः ।
सम्मता मतिमद्भिर्हि जीवानां सुखरूपता ॥३१॥
जीवाः सर्वे नियाम्या हि नियन्ता जानकीश्वरः ।
रामभक्तिं विना जीवैर्विश्रामो न हि लभ्यते ॥३२॥

भक्तिः

भक्तिश्च ब्रह्मणः सर्वस्वामिनः शार्ङ्गधारिणः ।
रामस्य तैलधारेवानवच्छिन्ना स्मृतिः स्मृता ॥३३॥
भक्तिर्भवाम्बुधेः सेतुः कर्मज्ञानाङ्गिनी मता ।
तस्याश्च साधनं बोध्यं विवेकादिकसप्तकम् ॥३४॥

जीवानां मिथो भेदः

भिन्ना एव न चाभिन्ना जीवाः सर्वशरिरगाः ।
ब्रह्मदेहो मतो जीवो न च ब्रह्म कदापि सः ॥३५॥
यदि हि सर्वजीवानामैक्यमेव भवेद्ध्रुवम् तदा ।
'सुखी चैकोऽपरो दुःखी चे' ति भेदः कथं भवेत् ॥३६॥
अन्तःकरणभेदाद्धि यदि भेदो भवेदसौ ।
सौभरेरात्मनो भेदो कथं नात्र बभूव नु ॥३७॥

जीवब्रह्मभेदः

जीवो ब्रह्मैव चेत् तस्य दुःखभोगो कथं किल ।
कथं नु जीववृन्दस्य नाना भोगा भवन्ति हि ॥३८॥
नन्वविद्यावशाद् ब्रह्म जीवतामुपयाति हि ।
मैवं प्रकाशतो यस्मात् तमश्चात्र पलायते ॥३९॥
मतं प्रकाशरूपं हि ब्रह्म च ब्रह्मवादिभिः ।
मता तमःस्वरूपा चाविद्या ह्यद्वैतिभिस्तथा ॥४०॥
प्रतिविम्बमविद्यायां जीवो हि ब्रह्मणो ननु ।
मैवं रूपादियुक्तस्य शशाङ्कादेरिवोदके ॥४१॥
जायते प्रतिविम्बं चाविद्यायां ब्रह्मणः कथम् ।
यतोऽद्वैतमतेऽरूपं मतं ब्रह्म समीरवत् ॥४२॥

तत्त्वमसि वाक्यार्थः

नन्वात्मपरमात्मैक्यं वक्ति 'तत्त्वमसि' श्रुतिः ।
मैवं भवेत् कथं चैक्यं सर्वेशानीशतत्त्वयोः ॥४३॥

वाच्ययोर्बाधितं चैक्य लक्ष्ययोः सम्मतं ननु ।
मैवं शक्त्यैव सम्पन्नेऽर्थे जघन्या हि लक्षणा ॥४४॥
तद्वाच्योऽत्र परं ब्रह्म श्रीयुतो राघवः श्रुतौ ।
त्वद्वाच्यस्त्वच्छरीरी हि श्रीरामोऽत्र मतो बुधैः ॥॥४५॥
देहाभिधायिशब्दा हि पर्यवस्यन्ति देहिनि ।
ऐक्यमुक्तं ततश्चात्र परान्तर्यामिणोः श्रुतौ ॥४६॥
जीवेशैक्यं न तद् वक्ति वाक्यं 'तत्त्वमसी' ति हि ।
जीवेशभिन्नतैवोक्ता 'भोक्ताभोग्यमि' ति श्रुतौ ॥४७॥
'उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।'
उक्तो भगवताऽप्येवं जीवभिन्नः परेश्वरः ॥४८॥

जीवभेदाः

बद्धमुक्तप्रभेदेन जीवाद्विधा मता बुधैः ।
खिन्ना प्रारब्धयोगेन बद्धाः संसारिणो मताः ॥४९॥
प्रपद्य भगवन्निष्ठं विरक्तं वैष्णवं गुरुम् ।
गृहीत्वा राममन्त्रं च रामं शरणमाप्नुयात् ॥५०॥
भजेत सद्गुरुं चाथ राघवं करुणानिधिम् ।
परोपकारको भूत्वा ब्रुयात् सत्यं प्रियं तथा ॥५१॥
विसृज्य क्रोधकामादीन् साधुसेवारतो भवेत् ।
शृणुयात् कीर्त्तयेन्नित्यं जानकीजानकीश्वरौ ॥५२॥
विहाय सकलामाशां श्रीरामं पूजयेद् यदि ।
राममन्त्रं जपेच्छश्वद् ध्यानाभ्यासपरो जनः ॥५३॥

तदा सुखमयं नित्यं रामधाम स्वभासुरम् ।
प्राप्नोति तत्प्रभावेण तनुं त्यक्त्वार्चिरादिना ॥५४॥
स्वप्रकाशं परेशं च सर्वथा सुखदायकम् ।
सुखेन सेवते मुक्तः सीतया सह राघवम् ॥५५॥
मरणादिभयं श्रीमद्रामधाम्नि न विद्यते ।
तारतम्यं विना रामभोगसाम्यं च तत्र हि ॥५६॥
विहाय जगदीशत्वं जगत्सृष्ट्यादिकं तथा ।
सर्वत्र गतिमाप्नोति मुक्तो नित्यं सुखं परम् ॥५७॥

नित्यं रामानुकूलत्वाद् रामसेवारतास्तथा ।
नित्या रामप्रसादेन कर्मवद्धा भवन्ति न ॥५८॥

अचित्तत्वम्

ज्ञानशून्यमचित्तत्त्वं तस्य भेदचतुष्टयम् ।
प्रकृतिश्चाथ कालश्च शुद्धसत्त्वं च शेमुषी ॥५९॥

जडाजडविभेदाच्च तस्य भेदद्वयं पुनः ।
आद्यद्वयं जडं तत्राजडमन्त्यद्वयं मतम् ॥६०॥

जडत्वं परभास्यत्वं तद्भिन्नाऽजडता मता ।
अजडं च द्विधा बोध्यं प्रत्यक्परागविभेदतः ॥६१॥

स्वस्मै स्वभासुरं चाद्यं परस्मै भासुरं परम् ।
आद्यं जीवेश्वरावन्त्यं शुद्धसत्त्वं च शेमुषी ॥६२॥

प्रकृतिः

जडा हि प्रकृतिर्ज्ञानशून्या च त्रिगुणाश्रया ।
प्रलये प्रकृतौ ज्ञेयाः समाः सत्त्वादयो गुणाः ॥६३॥
जायते गुणवैषम्यं श्रीरामस्य सिसृक्षया ।
विकारः प्रकृतेराद्यो जायते हि महांस्त्रिधा ॥६४॥
महत्तत्त्वविकारश्चाहङ्कारस्त्रिविधो मतः ।
सात्विको राजसश्चाथ तामसश्चेति संज्ञकः ॥६५॥

इन्द्रियम्

जायन्ते सात्विकाच्चाथ राजससहकारतः ।
एकादशेन्द्रियाण्यत्र तान्यणूनि मतानि हि ॥६७॥
आत्मव्यापारवद् द्रव्यं देहप्राणान्यदिन्द्रियम् ।
तद्धि रजस्तमःशून्यमप्राकृतं प्रकीर्त्तिम् ॥६७॥
रजोवच्च तमोवच्च तत् प्राकृतमुदीरितम् ।
ज्ञानकर्मेन्द्रियत्वाभ्यां तद् द्विधा सम्मतं बुधैः ॥६८॥
ज्ञानप्रसूतिहेतुस्तज्ज्ञानेन्द्रियतया मतम् ।
ज्ञानेन्द्रियेतरत् तद्धि कर्मेन्द्रियं प्रकीर्त्तितम् ॥६९॥
तत्र ज्ञानेन्द्रियस्याथ भेदाः प्राज्ञैर्मताश्चपट् ।
चक्षुषा गृह्यते रूपं रसनेन रसस्तथा ॥७०॥
गृह्यते च त्वचा स्पर्शः शब्दः श्रोत्रेण तत्र हि ।
घ्राणेन गृह्यते गन्धो मनोग्राह्याः सुखादयः ॥७१॥

भेदाः कर्मेन्द्रियस्याथ पञ्चैव सम्मता बुधैः ।
उच्यते तत्र वाचा हि पाणिना क्रियते तथा ॥७२॥
पादेन गम्यते चाथोपस्थेन मुखमाप्यते ।
कर्मेन्द्रियेण लाकेऽत्र पायुना त्यज्यते मलम् ॥७३॥

तन्मात्राणां भूतानाञ्चोत्पत्तिक्रमः

तामसाहङ्कृतेश्चाथ राजससंहकारतः ।
तन्मात्रद्वारकं चात्र जायते भूतपञ्चकम् ॥७४॥
सूक्ष्मं भूतं हि तन्मात्रं पञ्च शब्दादिसंज्ञकम् ।
भूतं हि द्रव्यं खं वायुस्तेजो जलं क्षितिस्तथा ॥७५॥
तत्रेत्थं हि विवेकोऽस्ति तामसाहङ्कृतेः खलु ।
जायते शब्दतन्मात्रमाकाशं च ततः किल ॥७६॥
आकाशात् स्पर्शतन्मात्रं तस्माद्वायुस्ततोऽथ च ।
जायते रूपतन्मात्रं तेजो भूतं ततश्च हि ॥७७॥
तेजसः रसतन्मात्रं तस्मादापस्ततः खलु ।
जायते गन्धतन्मात्रं तस्मात् पृथ्वी प्रजायते ॥७८॥

भूतानां गुणाः

तत्राकाशे गुणः शब्दः शब्दस्पर्शौ समीरणे ।
शब्दः स्पर्शश्च रूपं च तेजसो हि गुणास्त्रयः ॥७९॥
शब्दः स्पर्शश्च रूपं च रसश्चेति गुणा अपाम् ।
क्षितौ रूपरसस्पर्शशब्दगन्धा गुणा मताः ॥८०॥

इन्द्रियविषयाश्चैते त्वन्धीकुर्वन्ति देहिनम् ।
जीवा मृत्युरुजाऽऽक्रान्ता लोके विषयभोगिनः ॥८१॥
वैराग्यपूर्विका भक्तिर्जानकीजानकीशयोः ।
शास्त्रज्ञैः पुरुषैर्मृत्योर्भेषजत्वेन सम्मता ॥८२॥

कालः

भूतादिव्यहाराणां हेतुः कालस्त्वचिज्जडः ।
गुणत्रयविहीनः स नित्यं द्रव्य विभुस्तथा ॥८३॥
कार्यभूतः स चानित्यः शुद्धसत्त्वे प्रभुर्न च ।
अनुरुध्यात्र कालं हि रामो जगत् करोति हि ॥८४॥

जगतः सत्यत्वम्

परिणामो जगच्चैशः सद्वारकस्ततश्च सत् ।
न च विवर्त्तभूतं तद् विवर्त्तो न श्रुतौ श्रुतः ॥८५॥
लाके जालं यथा दृष्टमूर्णनाभिशरीरजम् ।
जगदेतन्मतं रामचिदचिद्ब्रह्मजं तथा ॥८६॥
पञ्चीकरणतः शुक्तौ रजतांशाश्च सन्ति हि ।
शुक्तिरौप्यं ततः सत्यं न च मिथ्या कदापि तत् ॥८७॥
'रौप्यं न' व्यवहारस्तु शुक्त्यंशानां बहुत्वतः ।
शुक्तौ 'रौप्यमि'ति ज्ञानं भ्रमरूपं ततः किल ॥८८॥

पञ्चीकरणम्

ईशेनैकैकभूतस्य कृतं भागद्वयं समम् ।
एकं निधाय चान्यस्य कृतं भागचतुष्टयम् ॥८९॥
स्वार्धं हित्वा परार्धेषु चैकैकं पिश्रितं पुनः ।
पञ्जीकरणतश्चैवं पञ्चभूतानि पञ्चसु ॥९०॥
सर्वत्र सर्वसत्त्वेऽपि यस्यार्धं यत्र विद्यते ।
प्रधानत्वाद्धि तत् भूतं तस्य नाम्नाऽभिधीयते ॥९१॥

शुद्धसत्त्वम्

सत्त्वरजस्तमःशून्यं शुद्धसत्त्वं प्रकीर्त्तिम् ।
श्रुतिस्तत्र प्रमाणं हि 'त्रिपादस्यामृतं दिवि' ॥९२॥
'स्वसत्ताभासकं द्रव्यं गुणमत्वाद् विलक्षणम् ।'
इति स्मृतिप्रमाणत्वादजडं तन्मतं बुधैः ॥९३॥
तच्चानन्दमयं नित्यं नित्यधामादिनामकम् ।
पार्श्वेपूर्व्वं मतं तच्चापरिच्छिन्नं मनीषिभिः ॥९४॥
अप्राकृतं परं धाम पुनरावृत्तिवर्जितम् ।
ब्रह्मणो नित्यमुक्तानां वासस्थानं च तत् स्मृतम् ॥९५॥
तद् भवतीशसङ्कल्पान्मुक्तदेहादिकं खलु ।
ज्ञानाद् भिन्नं च तत् तत्त्वं प्रकाशाद् विपर्ययेविना ॥९६
जीवादीशाच्च भिन्नं तज्ज्ञानशून्यत्वहेतुना ।
कालप्रकृतिभिन्न तदजडत्वादिहेतुतः ॥९७॥

धर्मभूतज्ञानम्

ज्ञानमर्थप्रकाशस्तन्नित्यं द्रव्यं तथाऽजडम् ।
यथा प्रभा तथा ज्ञानं विभुद्रव्यगुणात्मकम् ॥९८॥
अचिच्चेतनधर्मस्तद् बद्धानां तु तिरोहितम् ।
तन्नष्टादिप्रतीतिस्तु तत्सङ्कोचादिहेतुतः ॥९९॥
क्षरत्यन्तःस्थितं लोके हृतेः पादाद् यथोदकम् ।
निःसृत्येन्द्रियतो ज्ञानमर्थेन युज्यते तथा ॥१००॥
अहिकुण्डलवज्ज्ञाने सङ्कोचश्च विकासिता ।
नित्यात्मनित्यधर्मत्वाज्ज्ञानस्य नित्यता मता ॥१०१॥
स्वापादयश्च सिध्यन्ति यत् तमः प्रतिबन्धकम् ।
स्वीकृता हि बुधैर्ज्ञाने स्वत एव प्रमाणता ॥१०२॥
ज्ञानं विभुपराक्त्वाभ्यां जीवाद्भिन्नं बुधैर्मतम् ।
विभुत्वेऽपीशतो भिन्नं ज्ञानं पराक्त्वहेतुना ॥१०३॥
भक्तिश्चाथ प्रपत्तिश्च ज्ञानावस्थे हि मुक्तिदे ।
भक्तिर्विवेचिता पूर्वं प्रपत्तिरथ कथ्यते ॥१०४॥

प्रपत्तिः

प्रपत्तिर्न्यासविद्या सा रामायात्मसमर्पणम् ।
आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्जनम् ॥१०५॥
रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा ।
कार्पण्यमिति विद्वद्भिर्न्यासेऽङ्गान्यचकं मतम् ॥१०६॥

एतद्देहावसाने हि न्यासो मुक्तिप्रदायकः ।
शरणागतिवाच्योऽसौ कर्त्तव्यः सकृदेव हि ॥१०७॥
आर्त्तानां तु मतो न्यासः प्रारब्धस्यापि नाशकः ।
विद्वद्भिः सम्मतो न्यासेऽधिकारः सकलात्मनाम् ॥१०८॥

द्रव्यषट्कम् ।

कालप्रकृतिजीवेशाः शुद्धसत्वं च शेमुषी ।
इत्युपादानरूपाणि षड् द्रव्याणि मतानि हि ॥१०९॥

अद्रव्यदशकम्

सत्त्वं रजस्तमश्चाथ पञ्च शब्दादयो गुणाः ।
शक्तिस्तथैव संयोगोऽद्रव्याणि दशधा खलु ॥११०॥
ज्ञानस्योत्पादकं सत्त्वं प्रवृत्त्युत्पादकं रजः ।
प्रमादमोहयोश्चात्र कारणं हि मतं तमः ॥१११॥
रूपं चक्षुषः शब्दः श्रोत्रस्य विषयो मतः ।
रसनस्य रसः स्पर्शस्त्वचो घ्राणस्य गन्धकः ॥११२॥
हेतुतायास्तु हेतोर्हि शक्तिर्निर्वाहिका मता ।
संयुक्तव्यवहारस्य संयोगः कारणं किल ॥११३॥

प्रमाणभेदाः

प्रमाणं त्रिविधं बोध्यं प्रमेयाणां प्रसाधकम् ।
प्रत्यक्षमनुमानं च शब्दश्चेति विभेदतः ॥११४॥

मान्.रत्नावले ग्रन्थो मया पूर्वं विनिर्मित : ।
प्रमाणानां प्रपञ्चस्तु तत्रालोक्यो बुभुत्सुभि; ॥११५॥

ईश्वरभेदपञ्चकम्

परश्च विभवो व्यूहोऽन्तर्याम्यर्चातनुस्तथा ।
पञ्चधाऽवस्थितश्चैवं श्रीरामः सकलेश्वरः ॥११६॥
अद्वितीयः परो रामः सर्वनिन्दप्रदायकः ।
कीर्त्तनञ्च स्मृतिर्यस्य सेतू भवाम्बुधेर्मतौ ॥११७॥
स हि शरणशून्यानां शरणं दीनबान्धवः ।
स्वाभाविकगुणानां च शक्त्यादीनां महार्णवः ॥११८॥
मुक्तिदः स्वजनानां स सुशीलः सकलार्थवित् ।
तल्लीला जगतश्चास्य सृष्टिस्थितिलयाः स्मृताः ॥११९॥
सर्वदेही ततः सर्वः सर्वभिन्नः स्वरूपतः ।
सगुणं निर्गुणं चाथ श्रुतयस्तं वदन्ति हि ॥१२०॥
स प्राकृतैर्गुणैर्हीनश्चास्ति दिव्यगुणाम्बुधिः ।
ब्रह्म परात्परं रामो नित्यैर्मुक्तैर्नमस्कृतः ॥१२१॥
दिव्यदेहो घनश्यामो दिव्यवासोविभूषणः ।
दिव्यायुधोऽभिरामश्च श्रीरामो दिव्यपार्षदः ॥१२२॥
श्रीसाकेतविहारी सोऽवतारी क्लेशवर्जितः ।
दिव्यासनसमासीनो दिव्यधाम्नि विराजते ॥१२३॥

निग्रहेण विहीना याऽनुग्रहस्य महाम्बुधिः ।
गुणाकरश्च सर्वज्ञाऽतिरम्या सर्वमोहिनी ॥१२४॥
वेदवेद्या जगन्माता विभ्वी विश्वस्यपालिका ।
नमस्कार्या च सर्वेषां पूज्या स्तुत्या चैं सर्वदा ॥१२५॥
प्रभाकरप्रभातुल्या रामाभिन्नाऽखिलेश्वरी ।
राजते वामभागे सा जानकी जननी सदा ·१३५॥
विभवा बहुसंख्याका मत्स्यकूर्मादयो मताः ।
सृष्टचादिहेतवो व्यूहा वासुदेवादयश्च हि ॥१२७॥
ज्ञानबलादयस्तत्र वासुदेवे च षड् गुणाः ।
ज्ञानबलगुणौ चाथ सङ्कर्षणे हि सम्मतौ ॥१२८॥
वीर्यैश्वर्यद्वयं चाथ प्रद्युम्ने परिकीर्त्तितम् ।
अनिरुद्धे मतं प्राज्ञैः शक्तितेजोगुणद्वयम् । १२९॥
एतेभ्यो हि चतुर्भ्यश्च व्यूहाः श्रीकेशवादयः ।
प्रेरकः सकलान्तःस्थोऽन्तर्यामी राघवो मतः ॥१३०।
स्वाश्रिताभिमतं द्रव्यं स्वीकृत्य देहरूपतः ।
तत्राप्रकृतदेहेन विशिष्टोऽर्चातनुः प्रभुः ॥१३१॥
राजते भक्ततन्त्रः सन् स्वतन्त्रोऽपि च राघवः ।
स्वय व्यक्तःक्वचिद् दैवैः क्वचित् सिद्धैश्च मानवैः॥१३२॥
स्थापितो भाति सीतेशः सीतया च दयार्णवः ।
अमोघदर्शनश्चाथामोघाऽर्चनन्तिस्तवः ॥१३३॥
अर्चादिहेऽर्चितो लोकैर्दृष्टः स्तुतो नतोऽथवा ।

दत्ते रामश्च तेभ्यो हि पुरुषार्थचतुष्टयम् ॥१३४॥
राममभ्यर्च्य दृष्ट्वा च नत्वा स्तुत्वाऽथवा जनः ।
भवाम्बुधिं स्वयं तीर्त्वा स्वकुलं तारयत्यपि ॥१३५॥
वैष्णवभाष्यकारश्रीवैष्णवाचार्यनिर्मितः ।
श्रीरामानन्दसिद्धान्तसारः स्तात् तत्त्वबोधकः ॥१३६॥

इत्युपनिषद्भाष्यकारपण्डितसम्राट्स्वामि-
श्रीवैष्णवाचार्यवेदान्तपीठाचार्यप्रणीतः
श्रीरामानन्दसिद्धान्तसारः समाप्तः ।



शुद्धीपत्रम्

पृष्ठः	पंक्तिः	अशुद्धम्	शुद्धम्
१	२	भगवान्	भगवद्
"	३	"	"
"	४	"	"
३	२	सम्भृते	सोऽश्नु
४	७	चाययेऽशा	चार्यैरोंऽशा:
"	१२	अत	अतः
७	१७	शब्दा	शब्दात्
"	२५	प्रभुः	प्रभुः
"	२६	तत्तत्वं	तत्तत्वं
८	७	आरम्भण	आरम्भणं
"	२५	सत्वतः	सत्त्वतः
१२	१३	वस्त्व	वत्स्व
"	२५	नान्यने	नान्येने
१४	६	निलपन	निलयने
"	१४	जिज्ञाम्य	जिज्ञास्य
"	१७	नामा	नाम
"	२२	मत्य	मस्त्य
१५	१२	कृत्या चिद्	कृत्याचिद्
१७	२०	विद्यते	ईकल्य विद्यते
१९	१	सा रने	साधने
"	१६	मेवं	ईवं
२०	६	विद्याया	विद्यायां

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
"	११	चिच्छेक्ते	चिच्छक्ते
"	२४	उह्मादानं	उपादानं
२६	५	ऽऽ	ऽ
"	१८	नामि	नाभिः
२७	१६	फ.न्तो	कान्ततोऽ
"	२३	जग.तज्जन्मा	जगज्जन्मा
२९	६	भापा	भासा
"	२६	तात्पय	तात्पर्यं
३०	१०	बुद्धि	बुद्धिः
"	"	वाच्या	वाच्या ।
"	"	घ्यासरे	घ्यासो
"	११	इति	इति ।
३१	४	तस्याः प्रकृतिकार्यत्वेनाश्चेतन	तस्या अचेतन
"	"	याच्चेतन	याश्चेतन
३३	४	शास्त्रत्राणां	शास्त्राणां
"	१०	नु ते	नुशेते
३४	१३	सिद्धती	सिध्यती
"	२६	मनःतन	मनस्वत
३५	२२	ध्रुवास्मृति	ध्रुवस्मृति
३६	६	"	"
३७	१३	सामञ्जस्य	सामञ्जस्यं
३८	७	इतिसूत्रेण	इतिसूत्रेए
"	२५	त्म	दात्म
३९	६	वैयर्ग्यात्	वैयर्थ्यात्

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
४०	३	प्रथग	पृथग
"	६	दश	दस
"	८	संवल्प	संकल्प
"	१६	व्याख्यायाया	व्याख्यायी
"	२१	करमतां	कर्मतां
४१	६	अचक्षुं	अचक्षुः
"	२३	णमि	णमभि
४३	२१	तिष्ठत्तेक	तिष्ठत्येक
४४	२४	त्येम	त्येव
४५	२४	अप्रात्ते	अप्राप्ते
४८	२४	मानञ्चात्र	मानञ्चात्र
४९	८	त्रिक्षणो	त्रिक्षणा
५०	२२	विषमो	विषयो
५१	६	हरण्य	हिरण्य
"	१२	तयेदेति	तयेति
"	१९	विर्णा नत्या	वर्णा नित्या
५२	१३	दिदतीयान्तः	द्वितीयान्तः
"	२३	व्ययहारेण	व्यवहारेण
५३	७	ग्राहण	ग्रहण
"	८	सर्वोऽति	सर्वोऽपि
"	१६	नाम	नामा
५५	१२	परिपत्व	परिपव्व
५७	१९	तमीश्वरा	तमीश्वराणां
"	२०	तस्ं	तस्य
"	२१	श्रुत	श्रुतयः

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
"	२२	भगव	भगवद्
"	२३	दन्वत	दन्वतो
५९	८	निर्दिदष्टम्	निर्दिस्टम्
६४	२४	च-तथा	तथा च
६८	३	श्रयणात्	श्रवणात्
७०	२२	स्मृतिः	स्मरणम्
७२	१८	सर्वाविस्य	सर्वावित्तस्य
"	२६	गुणाभाजन	गुणभाजनं
७३	४	अधि	अधी
"	१	णात्	णाज्
७४	५	भिन्ने	भिन्नैः
"	५	त्वात्	स्वाद्
"	६	च यथा	च
"	७	स्वात्तथा	स्वात्
"	८	आनन्द	मानन्द
"	१५	शरीर	शरीरसंबधिनः
"	२२	धेद	वेद
७६	१	चत्प्रयोग	चेत्प्रयोग
"	१५	दाति	यति
"	२०	त्रत्ते	त्रत्ये
७७	१४	दम्	पदम्
"	२४	भवत चम्भवति	मुक्तम्भवति
७८	८	रूपखिल	रूःमखिल
"	२४	छान्तसः	छान्दसः
८३	१४	इत्ये	इत्ये

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
८३	१८	ऽत्य पेक्षा	ऽप्यपेक्षा
८४	१२	मोक्तृत्व	भोक्तृत्व
८५	११	पदेशात्	पदेशात्
८७	६	स्वभाविको	स्वाभाविकीं
"	१३	परमात्मेवैति	परमात्मैवेति
९१	८	कीशेय	कीक्षेय
९२	७	वेतो	चेतो
"	६	तत्तद्वारा	तद्द्वारा
"	१७	पृथवी	पृथिवी
९४	३	तत्समाना	तत्सामाना
"	१४	दिं	नि
९५	८	मवास्तीति	मेवास्तीति
९७	५	सन्धानाम्	सन्धानम्
१०	१८	सम्बध	सम्बन्ध
१०३	२०	बाधात् चा	बाधाच्चा
१०४	१७	व्योमतल्प	व्योमाल्प
१०"	१६	तास्मिन्नव	तास्मिन्नेव
१०६	११	रूपसेवनं	रुपसेचनं
१०८	११	मक्तर्पित	भक्तार्पित
"	"	प्रसिद्ध	प्रसिद्धे
"	१८	परमानोति	पारमाप्नोति
"	२५	वेह	नेह
११४	६	जन्या	जन्यः
१२१	८	थेंऽथन्तिर	थेऽर्थान्तर
"	२३	चोक्त	श्रोक्तं

पृष्ठः	पंक्ति	अशुद्धम्	अशुद्ध
१२४	१०	वैश्वानरो	वैश्वारोरो
१२४	१२	सम्पति	सम्प्रत्ति
,,	१३	पुण्रीक	पुण्डरीक
१२८	२१	प्रत्र	प्रत्र
१३१	१५	वदि ो	वादिनो
१३८	१६	उभावग्निश्च	उभावग्निश्च
१४०	१७	राकाश	राकाशः
१४१	४	स.ङ्ग तइवि	सङ्गत इति
१४४	५	व्यपार	व्यापार
,,	१७	अन्यायश्न	अन्यार्थश्च
१४६	१२	कानवाप्नोति	कान्कामानवाप्नोति
१४७	२३	वचनः	दचनः
१५०	१४	मत्वं	मस्वं
,,	१६	तावत	ताव (
,,	२३	हसं	हासं
१५१	५	सोऽह	सोऽहं
,,	६	त्वासुपासे	त्वामुपासे
,,	१६	मःवं	मत्त्वं
१५२	२२	मात	मात्
,,	२४	विति	वित्ति
१५३	६	यती	यति
१५४	७	म्यः	म्यः
,,	,,	मृपि	मृपी
१५५	४	येत	येत्
१५५	११	चिद्रूपं	चिदचिद्रूपं

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
१५५	१४	गन्मण्ड़ले	जगन्मण्डले
१५६	९	दुर्धपा	दुर्धर्षा
१५७	६	जैमिनि	जैमिनिः
१५८	९	पत्य	पत्यं
,,	१०	पर्य्यान्त	पर्य्यन्त
१५९	४	सत्वाश्रे	सत्त्वाश्रे
१६०	९	वर्जज्नात्	वर्ज्जनात्
१६३	२	२९	३९
,,	११	धियते	धीयते
१६५	२१	रूपान्त	रूपान्तः
१६९	२१	सदाऽशुचि	सदाशुचिः
१७१	२२	सारथिव	सरथित्व
१७२	१४	श्रुतिभिरा	श्रुतांरव्य
१७३	१२	वत्व	वत्त्व
,,	१५	सत्व	सत्त्व
१७४	१०	यक्त	व्यक्त
,,	१७	तिस्त्रो	तिस्रो
१७६	१८	वहिः	बह्वीः
१७७	२	सत्व	सत्त्व
,,	१०	प्रकृति	प्रकृति
१७८	९	कारण	कारणं
,,	११	ग्राह्मणः	ब्रह्मणः
,,	१३	पादन	पादक
,,	१४	पत्या	पत्त्या
१८४	६	स्व वाच्य	स्वस्त्ववाच्य

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
१८५	१	सम	र:म
"	२५	असन्नव	असन्नेव
१८८	१४	प्रतिग्राद्य	प्रतिपाद्य
"	१७	एतद्भूत	एतदभूत्
१९०	१२	दर्शनेनादि	दर्शनादि
१९१	१६	ग्रवस्थितेरति	अवस्थितेरिति
१९२	१२	चापनुरोधद्	चानुपरोधाद्
१९४	५	करणव	करणाव
१९७	१४	स्वमम्भू	स्वयम्भू
१९८	११	स्मृतिनाम	स्मृतीनाम
"	१६	हयंव	हॅयंव
२००	७	कार्यंस्त्वम्	काय्यंत्वम्
१९९	११	स्मृते	स्मृतेः
"	२२	चैतन्यो	चैतन्या
२०७	५	वावय	वाज्ञ
२०९	७	जगन्नदह्म	जगद्ब्रह्म
२१०	१९	यार्थं	यार्थं
२१३	२४	पारमार्थित्व	पारमार्थिकत्व
११७	२४	साम्यवस्थव	साम्यावस्थेव
२१९	९	लीला	लीलाकैवल्यमेवलीला
"	१५	स्यातम्	स्याताम्
२२०	१३	देश	देव
"	१५	चेप्यु	चेत्यु
२२५	२०	थय	अय

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
२२६	६	सर्वथा	सर्वदा
"	७	रस्थ	रस्य
२३०	१	घटभाव	घटाभाव
"	११	स्पर्शा।	स्पर्शादि
"	१३	णुत्वयो	णुत्वनित्यत्वयो
२३१	२१	प्रतिक्षो	प्रतिज्ञो
"	२२	कार्योत्पति	कार्योत्पत्तिः
२३४	१४	स्व-	स्वा
२३५	३	वत्तद्	तत्तज्
"	८	नुपत्तेः	नुपपत्तेः
२३८	३	कार्य	काय
२३९	५	वस्था	वस्था
२४६	८	करिणेषु	करणेषु
"	१९	नुक्तमम	नुत्तमम्
२४९	७	गोण्य	गौण्य
२५८	२४	णुत्वमेव	णुत्वमेवः
२५९	१	चोत्तरयो	चोत्तरयोः
२६३	२	नुपब्दयादि	नुपलब्ध्यादि
२६४	१	देप्ट्टणां	देप्ट्टणां
"	२०	विपर्यय	विपर्ययः
२७२	२२	भिवाम्भसा	मिवाम्भसा
२७३	२	दिप्य	दिव्व
२७६	१६	किञ्च	किञ्च
२७८	७	विभूत्वे	विभुत्वे
२८०	१८	शरिरे	शरीरे

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
२८३	११	मूति	मूर्ति
२८६	६	पायो	पायः
,,	११	ऽतेर्था	तेऽर्था
,,	११	रित्येऽतेर्था	रित्येतेऽर्था
२८९	२१	दशयति	दर्शयति
२९५	२३	.....	पञ्चमाहुति
३०१	७	परत्वे	परते
,,	८	कामात्	कामान्
३०८	५	त्वात	त्वात्
,,	,,	जीवस्यो	जीवस्य
३१०	१३	दृष्टान्त	दृष्टान्त
३१७	२	नीष्ट	निष्ट
,,	१६	प्रत्य	प्रेत्य
३२०	२	विषये	विपेये
३२५	११	पूवम्	पूर्वम्
,,	१८	मनुष्य	मनूष्य
३२९	११	छान्दोग्य	छान्दोग्ये
३३३	५	म्यां	म्यां
,,	२३	लब्धे ।	लब्धेः ।
३३७	८	साक्षद	साक्षाद
३३८	१९	सर्घा	सर्वा
३४१	१५	वेना	त्वेना
३४१	१८	तदुपासन	पदुपासना
३४३	५	अग्नतः	अग्नयः
,,	९	वलीयस्दपि	वलीयस्तदपि

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
"	११	ऐतस्मिन्	एतस्मिन्
"	१२	त्वा	त्व
"	१५	र्ध	मर्ध्
३४४	२२	घावः	माघः
३४५	६	तदक्तम्	तदुक्तम्
३४६	२	भावामिति	मिति
"	१३	वत्	वत्
३४७	१४	गोय	गीय
३४८	१७	प्रदेश	प्रादेश
३४९	१८	ब्रह्मनुभव	ब्रह्मानुभव
३५०	६	काम्यातु	काम्यास्तु
३५४	१२	ष्च	श्च
३५८	३	उपमर्दंञ्च	उतमर्दञ्च
३५९	८	साम्य	साम्य
"	२१	न्यम्य	न्यस्य
३६०	१	कत्य	कस्य
३६१	७	तस्थो	तस्यो
३६२	५	पास्ि	पारि
"	१२	भाद्विधि	माद्विधि
"	"	वेति	मेवेति
"	१४	स्वातन्त्र्यं	स्वातन्त्र्यं
"	१७	ब्रह्म	ब्रह्म
"	"	मयेक्षास्ति	मपेक्षास्ति
"	१८	कृतः	कुतः
"	१९	ब्रह्मणा	ब्राह्मणा

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
,,	२०	ब्रह्म	ब्रह्म
३६४	८	समा	शमा
,,	९	स्यायिति	स्यादिति
,,	१८	नात	नात्
३६५	१	जघं	जग्घं
,,	१२	कुतः	कृतः
३६६	७	तस्मा	तस्माद्
३६७	९	भवेत्	भवेत्
,,	१४	भयनुदति	भपनुदति
,,	१८	दृष्टे	दृष्टेः
३६८	४	स्य	स्य
३६९	८	कर्मणि	कर्मांणि
,,	१४	शास्त्रं	शास्त्रे
,,	१७	यस्यग्नि	स्याग्निं
३७१	५	फद्य	फल
,,	१४	फत्र	फल
३७२	१४	मन्त्व्य	मन्तव्य
,,	१९	बलभावेन	बालभावेन
३७३	८	कत्प्त	कृत्स्न
,,	१०	नुष्टान'	नुष्ठान'
,,	२२	ब्रह्मणः	ब्राह्मणः
३७४	८	पित्या	हित्या
,,	,,	विरधि	विरोधि
,,	१३	तद्नात	दर्शनात्
३७६	७	पीठा	पीठा

पृष्ठः	पंक्ति	अशुद्धम्	शुद्धम्
३७७	४	अथ	अथा
"	११	फलश्च	फलञ्च
३७८	२२	ग्रहयन्ति	ग्राहयन्ति
३७९	५	जष्टं	जुष्टं
"	१६	भिन्नमति	भिन्नमपि
"	१९	निष्ठान्नात्मनो	तिष्ठन्नात्मनो
३८०	३	एतश्च	एतच्च
"	५	मस्तीति	मस्मीति
"	८	पाथक्य	पार्थक्य
३८१	१३	पग्द्गीथ	पूद्गीथ
"	१७	इनि	इति
३८६	१०	सदेह	सदेहे
३९६	५	ाविद्वद्विषय	विद्वद्विषय
३९९	१५	तस्वा	तस्मा
४०२	३	जनन्योगी	जानन्योगी
४०५	११	तडित	तडितो
४०९	२	पराण	पुराण
४१२	८	कलुपि	कलुषितः
"	२३	यथा	य आ
४१३	२०	मित्य	नित्य
४१५	२१	मिहितम्	भिहितम्
४२१	१५	मियते	धीयते

क्वचित् क्वचित् (त्र) इत्यस्यस्थाने (त) इति मुद्रितं क्वचिच्च (.) अनुस्वारः स्फुटं न दृश्यते । तथा च स्वभावसुलभाः अन्या अपि काश्चन त्रुटयः स्युः, ताः संशोध्य कृपया सुधियः पठेयुः—इति सविनयं निवेदयति — स्वामी बालकृष्णाचार्यः ।